## छन्दसि वाऽप्राम्रेडितयोः । (४९/३६३४)

छन्दसि विषये विसर्जनीयस्य वा सकारादेशः भवति कुप्वोः परतः, प्रशब्दम् आम्रेडितं च वर्जयित्वा । अयःपात्रम्, अयस्पात्रम् । विश्वतःपात्रम्, विश्वतस्पात्रम् । उरुणःकारः, उरुणस्कारः । अप्राम्रेडितयोः इति किम् ? 'अग्निः प्रविद्वान्' (अ. वे. ५.२६.१) । 'परुषः परुषस्परि' (मै. २.७.१५.२१४) । '[1]सूर्यरश्मिर्हरिकेशः पुरस्तात्' (ऋ. १०.१३९.१), 'स नः पावक' (ऋ. १.१२.१०) इत्येवमादिषु 'सर्वे विषयश्छन्दसि विकल्प्यन्ते' (पु. प. ३५) इति सत्वं न भवति ॥

## कःकरत्करतिकृधिकृतेष्वनदितेः । (५०/३६३५)

कः करत् करति कृधि कृत इत्येतेषु परतः अनदितेः विसर्जनीयस्य सकारादेशो भवति छन्दसि विषये । कः–विश्वतस्कः । करत् – विश्वतस्करत् । [3]करति–[4]पयस्करति । कृधि–'उरु णस्कृधि' (ऋ. ८.७५.११) कृत–[5]सदस्कृतम् । अनदितेः इति किम् ? '[6]यथा नो अदितिः करत्' (ऋ. १.४३.२) ॥

## पञ्चम्याः परावध्यर्थे । (५१/३६३६)

छन्दसि इत्येव । पञ्चमीविसर्जनीयस्य सकारादेशो भवति परौ परतः [7]अध्यर्थे । '[8]दिवस्परि प्रथमं [9]जज्ञे' (ऋ. १०.४५.१) । 'अग्निर्हिमवतस्परि' (अ. वे. ४.९.९) । 'दिवस्परि' (ऋ. १. १२१. १०) । महस्परि । पञ्चम्याः इति किम् ? 'अहिरिव भोगैः पर्येति बाहुम्' (ऋ. ६.७५.१४) । परौ इति किम् ? एभ्यो वा एतल्लोकेभ्यः प्रजापतिः [10]समैरयत् । अध्यर्थे इति किम् ? 'दिव[11]स्पृथिव्याः पर्योज उद्भृतम्' (ऋ. ६.४७.२७) । [12]अत्र परिः सर्वतोभावे, अध्यर्थः [13]उपरिभावः ॥

## पातौ च बहुलम् । (५२/३६३७)

पातौ च धातौ परतः [14]पञ्चमीविसर्जनीयस्य बहुलं सकारादेशः भवति छन्दसि विषये[15] । 'दिवस्पातु' (ऋ. १०.१५८.१) । [16]राज्ञस्पातु । न च भवति । परिषदः पातु ॥

## षष्ठ्याः पतिपुत्रपृष्ठपारपदपयस्पोषेषु । (५३/३६३८)

षष्ठीविसर्जनीयस्य सकारादेशो भवति पति पुत्र पृष्ठ पार पद पयस् पोष इत्येतेषु परतः छन्दसि विषये । 'वाचस्पतिं विश्वकर्माणमूतये' (ऋ. १०.८१.७) । पुत्र – 'दिवस्पुत्राय सूर्याय'[17] (ऋ. १०.३७.१) । पृष्ठ– '[18]दिवस्पृष्ठे धावमानं [19]सुपर्णम्' (अ. १३.२.३७) । पार–'[20]अगन्म तमसस्पारम्' (वा. सं. १२.७३) । पद – '[21]इळस्पदे समिध्यसे' (ऋ. १०.१९१.१) । पयस् – [22]सूर्यं चक्षुर्दिवस्पयः । पोष – [23]'रायस्पोषं यजमानेषु धारय' (ऋ. १०.१२२.८) । षष्ठ्याः इति किम् ? [24]मनुः पुत्रेभ्यो दायं व्यभजत् ॥

---

1. सूर्यरश्मिः नास्ति ब. क. ड. ह. 2. ततः पावकः इ. ह. 3. अयस्करत् इत्यधिकम् क. 4. अयस्करति क. 5. सदस्कृतः क. 6. यथा नो नास्ति क. 7. छन्दसि विषये इत्यधिकम् इ. 8. प्रथमयज्ञे अग्निर्हि भवस्परि इत्यधिकम् ब. 9. जज्ञे नास्ति इ. 10. प्रत्यूषे इत्यधिकम् इ. 11. पृथिव्योः इ. 12. अत्र परिः सर्वतोभावे नास्ति ब. इ. 13. उपरितोभावः ह. 14. पञ्चम्याः क. इ. 15. पातु इति धातुनिर्देशः । पातौ धातुपरतः इत्यर्थः इत्यधिकम् इ. 16. रजसस्पातु क, नास्ति ब. ड. 17. शंसता इत्यधिकम् क, शंसतम् इत्यधिकम् ब. 18. दिवस्पृष्ठं वन्दमानः इ, दिवस्पृष्ठं धावमानः सुपर्णः ह. 19. सुवर्णम् क. 20. आगन्म ड 21. इडायास्पदे क. 22. पूर्वं चक्षुः ह, दिवस्पयः ऋ. 10.114.1 23. रायस्पोषाय बृहते हवामहे (वा. सं. 11.76) इ, रायस्पोषं औनभियं ह. 24. मातुः क.